

चतुर्थः पाठः

सूक्तिमौक्तिकम्

प्रस्तुतः पाठः नैतिकशिक्षाणां प्रदायकरूपेण विन्यस्तोवर्तते। अस्मिन् पाठे विविधग्रन्थेभ्यः नानानैतिकशिक्षाप्रदानिपद्यानि सं गृहीतानि सन्ति। अत्र सदाचरणस्य महिमा, प्रियवाण्याः आवश्यकता, परोपकारिणां स्वभावः, गुणार्जनस्य प्रेरणा, मित्रतायाः स्वरूपम्, श्रेष्ठसङ्गतेः प्रशंसा तथा च सत्सङ्गतेः प्रभावः इत्यादीनां विषयाणां निरूपणम् अस्ति। संस्कृतसाहित्ये नीतिग्रन्थानां समृद्धा परम्परा दृश्यते। तत्र प्रतिपादितशिक्षाणाम् अनुपालनं कृत्वा वयं स्व जीवनसफली कर्तुं शक्नुमः।

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।1।।

–*मनुस्मृतिः*

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।2।।

–*विदुरनीतिः*

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।3।।

–*चाणक्यनीतिः*

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः।।4।।

–*सुभाषितरत्नभाण्डागारम्*

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः।।5।।

–*मृच्छकटिकम्*

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम्।।6।।

–*नीतिशतकम्*

यत्रापि कुत्रापि गता भवेयु-
र्हंसा महीमण्डलमण्डनाय।
हानिस्तु तेषां हि सरोवराणां
येषां मरालैः सह विप्रयोगः।।7।।

–*भामिनीविलासः*

गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः।।8।।

–*हितोपदेशः*

शब्दार्थाः

वित्तम्	धनम्	धन, ऐश्वर्य	Money
वृत्तम्	आचरणम्	आचरण, चरित्र	Conduct
अक्षीणः	न क्षीणः, सम्पन्नः	नष्ट न हुआ	Not exhasted
धर्मसर्वस्वम्	कर्तव्यसारः	धर्म (कर्तव्यबोध) का सब कुछ	Gist of righteous ness
प्रतिकूलानि	विपरीतानि	अनुकूल नहीं	Aversive
तुष्यन्ति	तोषम् अनुभवन्ति	सन्तुष्ट होते हैं	Become satatisfied

वक्तव्यम्	कथनीयम्	कहना चाहिए	Worth saying
वारिवाहाः	मेघाः	जल वहन करने वाले बादल	Clouds
विभूतयः	समृद्धयः	सम्पत्तियाँ	Riches
गुणयुक्तः	गुणवान्, गुणसम्पन्नः	गुणों से युक्त	Meritorious
अगुणैः	गुणरहितैः	गुणहीनों से	With people without attributes
आरम्भगुर्वी	आदौ दीर्घा	आरम्भ में लम्बी	Bigger in the beginning
क्षयिणी	क्षयशीला	घटती स्वभाव वाली	Reducing
वृद्धिमती	वृद्धिम् उपगता	लम्बी होती हुई, लम्बी हुई	Increasing
पूर्वार्द्धपरार्द्ध-भिन्ना	पूर्वार्द्धेन परार्द्धेन च पृथग्भूता	पूर्वाह्ण और अपराह्ण (छाया)की तरह अलग-अलग	Different
खलसज्जनानाम्	दुर्जनसुजनानाम्	दुष्टों और सज्जनों की	Of bad and good people
महीमण्डल-मण्डनाय	पृथिवीमण्डलाल-ङ्करणाय	पृथ्वी को सुशोभित करने के लिए	For emblazoning the earth
मरालैः	हंसैः	हंसों से	With swans
विप्रयोगः	वियोगः	अलग होना	Separation
गुणज्ञेषु	गुणज्ञातृषु जनेषु	गुणों को जानने वालों में	Among connoisseuss
आस्वाद्यतोयाः	स्वादनीयजलसम्पन्नाः	स्वादयुक्त जल वाली	Filled with tasty water
आसाद्य	प्राप्य	पाकर	Reaching
अपेयाः	न पेयाः, न पानयोग्याः	न पीने योग्य	Undrinkable

अन्वयः-

1. वृत्तं यत्नेन संरक्षेत् वित्तम् एति च याति च।
   वित्ततः क्षीणः अक्षीणः (भवति) वृत्ततः (क्षीणः) तु हतः हतः।।
2. धर्मसर्वस्वं श्रूयतां श्रुत्वा च एव अवधार्यताम् आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।

3. सर्वे जन्तवः प्रियवाक्यप्रदानेन तुष्यन्ति। तस्मात् तत् एव वक्तव्यम् वचने दरिद्रता का?
4. नद्यः स्वयम् एव अम्भः न पिबन्ति, वृक्षाः स्वयं फलानि न खादन्ति। वारिवाहाः खलु सस्यं न अदन्ति, सतां विभूतयः परोपकाराय (एव भवन्ति)।।
5. पुरुषैः सदा गुणेषु एव हि प्रयत्नः कर्तव्यः। गुणयुक्तः दरिद्रः अपि अगुणैः ईश्वरैः समः न (न भवति)।।
6. आरम्भगुर्वी (भवति) क्रमेण क्षयिणी (भवति), पुरा लघ्वी (भवति) पश्चात् च वृद्धिमती (भवति) दिनस्य पूर्वार्द्धपरार्द्ध-छाया इव खलसज्जनानां मैत्री भिन्ना (भवति)।।
7. हंसाः यत्र अपि कुत्र अपि महीमण्डलमण्डनाय गताः भवेयुः। हानिः तु तेषां सरोवराणां हि (भवति) येषां (सरोवराणाम्) मरालैः सह विप्रयोगः भवति।।
8. गुणज्ञेषु गुणाः गुणाः भवन्ति, ते (गुणाः) निर्गुणं प्राप्य दोषाः भवन्ति। आस्वाद्यतोयाः नद्यः प्रवहन्ति, (ताः एव नद्यः) समुद्रम् आसाद्य अपेयाः भवन्ति।।

अभ्यासः

1. एकपदेन उत्तरं लिखत-

(क) वित्ततः क्षीणः कीदृशः भवति?
(ख) कस्य प्रतिकूलानि कार्याणि परेषां न समाचरेत्?
(ग) कुत्र दरिद्रता न भवेत्?
(घ) वृक्षाः स्वयं कानि न खादन्ति?
(ङ) का पुरा लघ्वी भवति?

2. अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-

(क) यत्नेन किं रक्षेत् वित्तं वृत्तं वा?
(ख) अस्माभिः (किं न समाचरेत्) कीदृशम् आचरणं न कर्त्तव्यम्?
(ग) जन्तवः केन तुष्यन्ति?
(घ) सज्जनानां मैत्री कीदृशी भवति?
(ङ) सरोवराणां हानिः कदा भवति?

3. 'क' स्तम्भे विशेषणानि 'ख' स्तम्भे च विशेष्याणि दत्तानि, तानि यथोचितं योजयत-

'क' स्तम्भः	**'ख' स्तम्भः**
(क) आस्वाद्यतोयाः	(1) खलानां मैत्री
(ख) गुणयुक्तः	(2) सज्जनानां मैत्री
(ग) दिनस्य पूर्वार्द्धभिन्ना	(3) नद्यः
(घ) दिनस्य परार्द्धभिन्ना	(4) दरिद्रः

4. अधोलिखितयोः श्लोकयोः आशयं हिन्दीभाषया आङ्ग्लभाषया वा लिखत-

(क) आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम्।।

(ख) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।।

5. अधोलिखितपदेभ्यः भिन्नप्रकृतिकं पदं चित्वा लिखत-

(क) वक्तव्यम्, कर्तव्यम्, सर्वस्वम्, हन्तव्यम्।
(ख) यत्नेन, वचने, प्रियवाक्यप्रदानेन, मरालेन।
(ग) श्रूयताम्, अवधार्यताम्, धनवताम्, क्षम्यताम्।
(घ) जन्तवः, नद्यः, विभूतयः, परितः।

6. स्थूलपदान्यधिकृत्य प्रश्नवाक्यनिर्माणं कुरुत-

(क) **वृत्ततः** क्षीणः हतः भवति।
(ख) **धर्मसर्वस्वं** श्रुत्वा अवधार्यताम्।
(ग) **वृक्षाः** फलं न खादन्ति।
(घ) **खलानाम्** मैत्री आरम्भगुर्वी भवति।

7. अधोलिखितानि वाक्यानि लोट्लकारे परिवर्तयत-

यथा- सः पाठं पठति। - सः पाठं पठतु।
(क) नद्यः आस्वाद्यतोयाः सन्ति। - .....
(ख) सः सदैव प्रियवाक्यं वदति। - .....
(ग) त्वं परेषां प्रतिकूलानि न समाचरसि। - .....
(घ) ते वृत्तं यत्नेन संरक्षन्ति।- .....
(ङ) अहं परोपकाराय कार्यं करोमि। - .....

परियोजनाकार्यम्

(क) परोपकारविषयकं श्लोकद्वयम् अन्विष्य स्मृत्वा च कक्षायां सस्वरं पठ।
(ख) नद्याः एकं सुन्दरं चित्रं निर्माय संकलय्य वा वर्णयत यत् तस्याः तीरे मनुष्याः पशवः खगाश्च निर्विघ्नं जलं पिबन्ति।

योग्यताविस्तारः

संस्कृत साहित्य में नीति-ग्रन्थों द्वारा नैतिक शिक्षाएँ दी गई हैं, जिनका उपयोग करके मनुष्य अपने जीवन को सफल और समृद्ध बना सकता है। ऐसे ही बहुमूल्य सुभाषित यहाँ संकलित हैं, जिनमें सदाचरण की महत्ता, प्रियवाणी की आवश्यकता, परोपकारी पुरुष का स्वभाव, गुणार्जन की प्रेरणा,

मित्रता का स्वरूप और उत्तम पुरुष के सम्पर्क से होने वाली शोभा की प्रशंसा और सत्संगति की महिमा आदि विषयों का प्रतिपादन किया गया है।संस्कृत-साहित्य में सारगर्भित, लौकिक, पारलौकिक एवं नैतिकमूल्यों वाले सुभाषितों की बहुलता है जो देखने में छोटे प्रतीत होते हैं किन्तु गम्भीर भाव वाले होते हैं। मानव-जीवन में इनका अतीव महत्त्व है।

भावविस्तारः

(क) **आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः।**

खारे समुद्र में मिलने पर स्वादिष्ट जलवाली नदियों का जल अपेय हो जाता है। इसी भावसाम्य के आधार पर कहा गया है कि **"संसर्गजाः दोषगुणाः भवन्ति।"**

(ख) **छायेव मैत्री खलसज्जनानाम्।**

दुष्ट व्यक्ति मित्रता करता है और सज्जन व्यक्ति भी मित्रता करता है। परन्तु दोनों की मैत्री, दिन के पूर्वार्द्ध एवं परार्द्ध कालीन छाया की भाँति होती है। वास्तव में दुष्ट व्यक्ति की मैत्री के लिए श्लोक का प्रथम चरण **"आरम्भगुर्वी क्षयिणी क्रमेण"** कहा गया है तथा सज्जन की मैत्री के लिए द्वितीय चरण **'लघ्वी पुरा वृद्धिमती च पश्चात्'** कहा गया है।

भाषिकविस्तारः

(1) **वित्ततः** - वित्त शब्द से तसिल् प्रत्यय किया गया है। पंचमी विभक्ति के अर्थ में लगने वाले तसिल् प्रत्यय का तः ही शेष रहता है। उदाहरणार्थ- सागर + तसिल् = सागरतः, प्रयाग + तसिल् = प्रयागतः, देहली + तसिल् = देहलीतः आदि। इसी प्रकार **वृत्ततः** शब्द में भी तसिल् प्रत्यय लगा करके वृत्ततः शब्द बनाया गया है।

(2) **उपसर्ग** - क्रिया के पूर्व जुड़ने वाले प्र, परा आदि शब्दों को उपसर्ग कहा जाता है।

जैसे - 'हृ' धातु से उपसर्गों का योग होने पर निम्नलिखित रूप बनते हैं

प्र + हृ - प्रहरति, प्रहार (हमला करना)
वि + हृ - विहरति, विहार (भ्रमण करना)
उप + हृ - उपहरति, उपहार (भेंट देना)
सम् + हृ - संहरति, संहार (मारना)

(3) शब्दों को स्त्रीलिङ्ग में परिवर्तित करने के लिए स्त्री प्रत्यय का प्रयोग किया जाता है। इन प्रत्ययों में टाप् व ङीप् मुख्य हैं।

जैसे- बाल + टाप् - बाला
अध्यापक + टाप् - अध्यापिका
लघु + ङीप् - लघ्वी
गुरु + ङीप् - गुर्वी